दिनाङ्क :- 05.07.2025 प्रात: - 06:55

**अथ वार्ता:**

**प्रधानमन्त्री त्रिनिदाद्-टोबैगो**

प्रधानमन्त्री नरेन्द्रमोदी त्रिनिदाद्-टोबैगो- देशस्य द्विदिवसीयसफलयात्रां समाप्य पञ्चराष्ट्रयात्रायाः तृतीये चरणे अर्जेण्टीना-देशस्य ब्यूनस्-ऐरेस्-नगरं प्रति गतवान्।

त्रिनिदाद्-टोबैगो- देशस्य आधिकारिकयात्रायां द्वयोः देशयोः ऐतिहासिक:, सांस्कृतिक:, द्वैपाक्षिक: च सम्बन्धः उन्नतः अभवत्। गतरात्रौ प्रस्थानात् पूर्वं, प्रधानमन्त्री मोदी त्रिनिदाद्-टोबैगो-संसदि संयुक्तसम्मेलने ऐतिहासिक-भाषणे, अवोचत् यत् लोकतन्त्रं भारतस्य कृते केवलं राजनैतिकव्यवस्था न अपितु जीवनमार्गः इति ।

## PM MODI ON DEMOCRACY-

प्रधानमन्त्री श्रीनरेन्द्रमोदी त्रिनिदाद टोबैगो देशे षष्ठवंशश्रेणिक भारतीयमूलस्य नागरिकाणां कृते ओ.सी.आई-कार्ड इति भारतीय-विदेशी-नागरिकपत्रस्य घोषणां कृतवान्, येन ते भारते प्रतिबन्धं विना निवासं कार्यं च कर्तुं शक्नुवन्ति। ह्यः प्रातः त्रिनिदाद टोबैगो देशे एकं कार्यक्रमं सम्बोधयन् श्रीमोदी भारतीयसमुदायं स्व-पैतृकभूमौ भ्रमितुं, भारतेन सह-सम्बन्धं गभीरं कर्तुं च प्रोत्साहितवान्।

**प्रधानमन्त्री अर्जेंटीना**

पञ्च-राष्ट्रयात्रायाः अग्रिमपदे प्रधानमन्त्री नरेन्द्रमोदी राष्ट्रपतेः जेवियर मिलेइ इत्यस्य आमन्त्रणेन, अर्जन्टीनादेशं प्रति गतवान्। इयं च सप्तपञ्चाशत्-वर्षेषु भारतीयप्रधानमन्त्रित्वेन अर्जेन्टिनादेशस्य प्रथमा द्विपक्षीययात्रा अस्ति। चर्चासु प्रचलित-सहकार्यस्य समीक्षा भविष्यति, द्वयोः राष्ट्रयोः सामरिक सहभागिता-वर्धनस्य उपायाः च अन्वेषिताः भविष्यन्ति। आकाशवाण्या सह विशेषसंवादे अर्जेन्टिनादेशे भारतस्य राजदूतः अजनीशकुमारः, प्रधानमन्त्रिणः भ्रमणकाले चर्चायाः सम्भाव्यक्षेत्राणां रूपरेखां प्रकाशितवान्।

पीएम ब्रिक्स्-शिखरसम्मेलन

प्रधानमन्त्री नरेन्द्रमोदी अस्य मासस्य षट् सप्त दिनाङ्कयो: ब्रज़िल्-देशस्य रियो डी जेनेरो - क्षेत्रे ब्रिक्स्-शिखरसम्मेलने भागं ग्रहीष्यति, अवधेयं यत् प्रायः षट् दशकेषु प्रथमवारं भारतीयप्रधानमन्त्रिणः ब्राज़िल-देशस्य द्वैपाक्षिकयात्रा भविष्यति। स्वस्य यात्रायाः

समये, श्रीमोदी ब्रज़िल्-देशस्य राष्ट्रपतिना लूयिज् इनासियो लुला डा सिल्वा इत्यनेन सह, शिखरसम्मेलने अन्यैः वैश्विकनेतृभिः सह वार्तालापं करिष्यति।

## बाहुडा-यात्रायाः पुरी

अद्य ओडिशा-राज्यस्य पुरी-नगरे बाहुडा-यात्रायाः सज्जता पूर्णतया प्रचलति। भगवतः जगन्नाथस्य त्रयः भव्यरथाः, भगवतः अग्रजः बलभद्रः, तेषां भगिनी देवी सुभद्रा च गुण्डिचा-देवालयस्य पुरतः स्थिताः सन्ति, ये श्रीजगन्नाथ-देवालयं प्रति प्रत्यागमनयात्रायाः कृते सज्जाः सन्ति। अवधेयं यत् गुण्डिचा-देवालयस्य गर्भगृहात् बहिः भगवत: यात्रा पहण्ड् इति विस्तृत-अनुष्ठानेन आरभ्यते, या मध्याह्ने प्रायः आरभ्यते। यदा विशेषसंस्काराः सम्पन्नाः भवन्ति तदा गुण्डिचा-देवालयात् देवानां परिवहनार्थं औपचारिकयात्रा आरभ्यते। रथयात्रा-उत्सवस्य भागरूपेण, श्वः देव: 'सुनाबेशा' अथवा सुवर्ण वस्त्रेण अलङ्कृताः भविष्यन्ति, यत् प्रतिवर्षं लक्षान् भक्तान् आकर्षयति।

## संस्कृत-साप्ताहिकी

प्रिया: श्रोतार:, संस्कृत-जगता सम्बद्धै: विभिन्नै: क्रिया-कलापै: संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्या: एफ्.एम्.गोल्ड्-प्रवाहिकात: श्व: मध्याह्ने सार्धैक-वादनत: भविष्यति। भवन्त: सर्वे यथाकालं श्रोतुं प्रभवन्ति।

॥ इति वार्ता:॥